N.A.
Jagadishi siddhanta
जागदीशी सिद्धान्त
Sanskrit
Paper - Handwritten
N.A. (very old)
9 Folio,
14.8"x 4.8"
Complete

प्रतीति

श्रीरामचन्द्रायनमः महानसीयवह्निर्नास्तीतिसिद्धान्तभावमादायाऽव्याप्तिवारणाय प्रतियोगितायां साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वं ज
गदीशेन निवेशितं तथाच महानसीयवह्न्यभावीयप्रतियोगितायाः साध्यतावच्छेदकवह्नित्व महानसीयत्वएतदुभयावच्छिन्नत्वात् तादृशप्रति
योगिता न लक्षणघटकेति प्रतियोगितायां साध्यतावच्छेदकानवच्छिन्नत्वनिवेशेन महानसीयवह्न्यभावमादायाऽव्याप्तिवारणसंभवेपि धूमवा
न्वह्नेरित्यादावतिव्याप्तिः तथाहि साध्यतानवच्छेदकावच्छिन्ना घटाभावप्रतियोगितैव तदनवच्छेदकत्वं धर्मत्वेसत्त्वात् एवं प्रतियोगितायां
साध्यतावच्छेदकेतरानवच्छिन्नत्वनिवेशे वह्निमान्धूमादित्यादौ घटाभावप्रतियोगितायाः साध्यतावच्छेदकेतरावच्छिन्नतया लक्षणाघ
टकत्वात्सर्वत्रासंभवः स्यात् अतः प्रतियोगितायां साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वं निवेशितं अथ किमिदं साध्यतावच्छेदक
तादितरोभयानवच्छिन्नत्वं तत्र न तावत्साध्यतावच्छेदकतादितरोभयनिष्ठावच्छेदकतानिरूपकत्वं तथासति महानसीयवह्न्यभावीयप्रति
स्यतादि योगितायावारणासत्त्वप्रो व्याप्त्यापत्तेः तथाहि महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकता वह्नित्वनिष्ठा निरवच्छिन्ना समवायसंबन्धावच्छि
न्ना च महानसीयत्वनिष्ठा तु महानसीयत्वत्वावच्छिन्ना स्वरूपसंबन्धावच्छिन्ना तथाच सावच्छिन्ना निरवच्छिन्ना भेदेन संसर्गभेदेन च भिन्नतया कापि
[illegible] न्ने तादृशाभावीयप्रतियोगितावच्छेदकता न वह्नित्वतदितरोभयनिष्ठा किंतु जातिभेदाभावीयजातित्वावच्छिन्नप्रतियोगितावच्छेदक
तानिरूपकत्वस्य महानसीयवह्न्यभावीयप्रतियोगितायां सत्त्वात् प्रतियोगितावच्छेदकतावच्छेदकधर्मप्रतियोगितावच्छेदकसंबन्ध

...व प्रतियोगितावच्छेदकभेदेऽपि प्रतियोगितावच्छेदकभेदोपगमे जातित्वावच्छिन्नावच्छेदकताया अपि नानात्वेन कस्याश्चिदपि तत्सा-
...तरोभयनिष्ठत्वाभावेन साध्यतावच्छेदकतदितरोभयनिष्ठत्वाभावादप्रसिद्धेरावारकत्वात् किन्तु साध्यतावच्छेदकनिष्ठावच्छे-
दकतानि[illegible]कासत्ते तदितरानिष्ठावच्छेदकतानिरूपिकाया तत्प्रत्यत्वमेव तथा च महानसीयवह्न्यभावीयप्रतियोगितायां साध्यतावच्छेदक-
निष्ठावच्छेदकतानिरूपकत्वेन तदितरमहानसीयत्वनिष्ठावच्छेदकतानिरूपकत्वेन च लक्षणाघटकत्वेति नचावच्छेदकत्व[illegible]यानिरूपकत्वस्य
प्रतियोगितायां निवेशेऽपि महानसीयवह्न्यभावमादाय व्याप्तिवारणसंभवे एतादृशगुरुतरप्रयासो अनुचित इति वाच्यं महानसीयवह्नि-
मान् धूमादित्यादावतिव्याप्त्यापत्तेः तथाहि महानसीयवह्न्यभावीयप्रतियोगितायामेव अवच्छेदकतानिरूपकत्वेन लक्षणघटकत्वानुप-
पत्तेः ननु समवायसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावीयप्रतियोगिताया अपि वह्नित्वनिष्ठावच्छेदकतानिरूपकत्वेन तदितरसमवा-
यनिष्ठसंसर्गतावच्छेदकतानिरूपकत्वेन च लक्षणाघटकतया अत्रापि विवक्षणे प्रयस्य प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्यैव
[illegible]व्ये नच तदितरनिष्ठावच्छेदकतायां संसर्गताभिन्नत्वस्य निवेशान्नियम् अन्यथा धूमवान् वह्नेरित्यादौ संयोगसंबन्धावच्छिन्नप्रतियोगि-
ताकधूमाभावप्रतियोगिताया अपि धूमत्वनिष्ठावच्छेदकतानिरूपकत्वेन तदितरसंयोगनिष्ठसंसर्गताख्यावच्छेदकतानिरूपक-
त्वेन लक्षणघटकत्वेनानुपपत्तेरित्याविरिति वाच्यं तदितरपदेन संसर्गप्रकारकसाधारणसाध्यतावच्छेदकत्वावच्छिन्नप्रतियोगितावच्छे-
दकत्वस्य विवक्षितत्वात् । नच समवायेन संयोगेन साध्यसाध्यताघटत्वादि हेतुः तत्राव्याप्तिः हेत्वधिकरणीभूतानां वयविनि घटे वर्तमानस्य सं-

योगिनः समवायसंबंधावच्छिन्नप्रतियोगिताकाभावस्य निरूपकसाध्यतावच्छेदकतादितरोभयानवच्छिन्नाया संबंधाविधयावच्छेदकत्व 3
साध्यतावच्छेदकीभूतसमवायरूपधर्मसत्त्वात् प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छेद्यत्वनिवेशे तादृशाभावीयप्रतियोगि
तान लक्षणघटकेतियाच्यं संसर्गताभिन्नतादृशप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदकधर्मे विवक्षायेन तत्राव्याप्तिवारणसंभ
वे प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशस्य तथापि नैष्फल्याभ्यापत्तेरितिचेन्न संयोगिनो यत्र कालिकसंबंधेन साध्यत्वं तत्र [illegible] क्रिया
[illegible]त्वादिकमुच्यहेतु तत्र हेत्वधिकरणीभूततत्क्रियायां संयोगिनः संयोगसंबंधावच्छिन्नप्रतियोगिताकाभावस्य सत्त्वेन तत्प्रतियोगितायाः
निरूपकसाध्यतावच्छेदकतादितरोभयधर्मानवच्छिन्नतायाधर्मविधया अवच्छेदकत्वस्य साध्यतावच्छेदकीभूतधर्मे सत्त्वात् अव्याप्त्यापत्तेः
अतः प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वानिवेशः ननु प्रमेयवान् वाच्यत्वादित्यादौ साध्यतावच्छेदकतादितराप्रसिद्ध्या
अव्याप्तिवारणाय स्वानवच्छिन्नप्रकारतावच्छेदकत्व तु दितरपदेन विवक्षितं तत्र स्वपदं साध्यतावच्छेदकपरं ननु स्वावच्छिन्नप्रकारता
स्वतदितरपदेन) वच्छेदकत्वं विवक्षितत्वेऽपि कथं प्रमेयसाध्यतावच्छेदके स्थले इत्यव्याप्तिव्युदासः तथाहि साध्यतावच्छेदकीभूतप्रमेयत्वावच्छिन्ना घटत्वे
घटत्वाद्यवच्छिन्नाकापि स्वानवच्छिन्नप्रकारतानिरूपकघटत्वघटत्वाद्यात्मके प्रमेयत्वे वच्छिन्नत्वात् किंतु घट इत्याकारकज्ञानीयघटत्व
निष्ठनिरवच्छिन्नप्रकारतैवतदवच्छेदकत्वस्याप्रसिद्ध्या तदितराप्रसिद्धितादवस्थ्यं यदि च प्रमेयत्वादिविशिष्टस्य साध्यतावच्छेदकमू
ले स्वपदं साध्यतावच्छेदकतावच्छेदकविशिष्टपरं तथाच घटवानित्याकारकज्ञानीयघटत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकप्र
कारतान प्रमेयत्वविशिष्टावच्छिन्ना किंतु प्रमेयघटवानित्याकारकज्ञानीयप्रकारतैव तदितरघटवानित्याकारकज्ञानीयप्र
प्रकारता तदवच्छेदकत्वस्य घटत्वे सत्त्वात् तादृतरपदेन ग्रहणमेव —

व्यो०टी०

घ इंशाक्यतेऽरस्यते न तथापि प्रमेयसाध्यतावच्छेदकस्थले घटाद्यभावीयप्रतियोगिताया अपि घटत्वरूपसाध्यतावच्छेदकीभूतप्रमेयनि
ष्ठावच्छेदकतानिरूपकतया प्रमेयत्वविशिष्टज्ञानवच्छेदकताघटत्वानित्यत्वाकाशत्वानीयप्रकारतावच्छेदकघटत्वादिनिष्ठावच्छेदकतानि
रूपकतया च निरुक्तसाध्यतावच्छेदकतद्भिन्नत्वोभयधर्मावच्छिन्नभिन्नायाः प्रतियोगिताया। प्रमेयसाध्यतावच्छेदकस्थले ऽप्रसि॥
द्ध्या व्याप्तिर्दुर्वारैव न च प्रमेयादिसाध्यतावच्छेदकस्थले साध्यतावच्छेदकतावच्छेदकावच्छिन्नावच्छेदकतानिरूपिका।
सति साध्यतावच्छेदकावच्छिन्नावच्छेदकतानिरूपकप्रकारतावच्छेदकनिष्ठावच्छेदकतानिरूपिकातद्न्यत्वमेव प्रतियोगिता
यां निवेशनीयम् तथा च घटाभावीयप्रतियोगिताक[?]याः साध्यतावच्छेदकतावच्छेदकावच्छिन्नावच्छेदकतानिरूपक
त्वाभावं विना तादृशावच्छेदकतानिरूपकप्रमेयवद्घटाभावीयप्रतियोगिताभिन्नत्वात् घटाभावीयप्रतियोगिताया अ
न घटकोति प्रमेयसाध्यतावच्छेदकस्थलेनाव्याप्तिरिति वाच्यं तथा सति वह्नित्ववत्वाद्यभावादित्यादौ महानसीयवह्न्यभावमा
दायाव्याप्त्यापत्तेः तथाहि वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकत्वमहानसीयवह्न्यभावप्रतियोगितायाः
साध्यतावच्छेदकावच्छिन्नावच्छेदकतानिरूपकत्वाभावेन तादृशोभयधर्मानवच्छेद्यत्वादिति न च विशिष्टसाध्यतावच्छे
दकस्थले तादृशोभयानवच्छेद्यत्वविशिष्टप्रतियोगितानिरूपितं यासावच्छिन्नावच्छेदकत्वं तदभाववत्त्वं साध्यतावच्छे
दके विवक्षणीयं तथा च महानसीयवह्न्यभावप्रतियोगितानिरूपितायासावच्छिन्नावच्छेदकतासा न वह्नित्वनिष्ठा

किन्तु महानसीयनिष्ठैव तदभावस्य वाह्नित्वे सत्यात् नाव्याप्तेरितिवाच्यं एवं सति रूपत्वन्यूनवृत्तिजातिमद्रूपादित्यादौ सर्वासामेव रूपत्वन्यूनवृत्ति॥
जातीनां तेनु पत्तनुरूपाणां निरवच्छिन्नावच्छेदकतासत्त्वेनाव्याप्त्यभिधानस्यासंगतत्वापत्तेः इति चेदत्र ब्रूमः साध्यतावच्छेदकताविशिष्टा
वच्छेदकतानिरूपिका सति या तद्विशिष्टान्यावच्छेदकतानिरूपिका तदन्यत्वमेव तादृशप्रतियोगितायां निवेशनीयम् साध्यतावच्छेदक
तावैशिष्ट्यं च स्वसामानाधिकरण्य अवच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकस्वाभाववद्धर्मानवच्छिन्नत्व एतदुभयसंबंधेन उभयत्र
स्वपदं साध्यतावच्छेदकपरं तथा च वह्निमान्धूमादित्यादौ साध्यतावच्छेदकविशिष्टायां वह्नित्वनिष्ठनिरवच्छिन्नप्रतियोगितावच्छेदकताया
वह्नित्वनिष्ठनिरवच्छिन्नसाध्यतावच्छेदकतासामानाधिकरण्यस्यावच्छेदकतासंबंधावच्छिन्नस्वाभाववविशिष्टधूमानवच्छिन्नत्वोभ
भयसंबंधवत् महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताकन्निष्ठावच्छेदकतानिरूपिका सति तदन्या या महानसीयनिष्ठावच्छेदकता न्य
तन्निरूपिका महानसीयवह्न्यभावीयत्वलक्षणघटक इति न तत्राव्याप्तिः प्रमेयवद्धानवाच्यत्वात्यादित्यादौ घटाभावीयघटत्वनिष्ठनिरवच्छिन्न
प्रतियोगितावच्छेदकतायां प्रमेयत्वावच्छिन्नसाध्यतावच्छेदकसामानाधिकरण्य अवच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकप्रमेयत्वावच्छिन्नसाध्यता
वच्छेदकधर्मावच्छिन्नत्व उभयसंबंधेन घटत्वनिष्ठनिरवच्छिन्नावच्छेदकता न साध्यतावच्छेदकताविशिष्टान्या इति घटाभावप्रतियोगितायां साध्यताव
च्छेदकविशिष्टान्यावच्छेदकतानिरूपकत्वविरहेण घटाभावो न लक्षणघटकः स्वसामानाधिकरण्यमात्रेण साध्यतावच्छेदकताविशिष्टत्वनिवेशे प्रमेयवद्धानवा
च्यत्वादित्यादौ सर्वासामवच्छेदकतानां प्रमेयत्वावच्छिन्नसाध्यतावच्छेदकतासामानाधिकरण्यसत्त्वेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वाप्रसिद्धिः त
तौ अवच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकाभाववद्धर्मावच्छिन्नत्वस्य संबंधविधया निवेशः तथा च घटत्ववान्नास्तीति प्रतीतिसिद्ध घटत्वावच्छिन्न
प्रतियोगितावच्छेदकतायां अवच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकप्रमेयत्वावच्छिन्नसाध्यतावच्छेदकताभावविशिष्टघटत्वत्वावच्छिन्न

श्रीदुर्गा

ज्ञा

(साध्यतावच्छेदकता)

तथा नस्वाभाववद्धर्मावच्छिन्नत्वस्वसामानाधिकरण्यमन्त्तदुभयसंबंधेन कृच्चनिविशिष्टत्वमितितादृशोभयसंबंधेनसाध्यतावच्छेदकविशिष्टान्यापादकत्व
यावच्छिन्नायास्व प्रतियोगितावच्छेदकतायाः प्रसिद्धिः स्वाभाववद्धर्मावच्छिन्नत्वमात्रेण साध्यतावच्छेदकवैशिष्ट्योक्तौ विवक्षितासंबंधेन घटत्वविशि
ष्टस्य पटत्वतादात्म्ये न साध्यत्वं घटत्वविशिष्टं न त्वं हेतुस्तत्र हेत्वधिकरणीभूत घट इत्याकारक ज्ञान विवक्षितासंबंधेन यं घटत्वविशिष्टं यं विषयितासं
बंधेन पटत्वविशिष्ट पक्षः पटश्चेति समूहालम्बने जाते स्वरूपतो भानस्वीकारात् अत एव घट इति ज्ञानानन्तरं घटत्वेन संजानामि इति स्वरूपतो घ
टत्वप्रकारेण ज्ञानानुव्यवसाय इति जगदीशसम्मतं तथा च पटत्वनिष्ठविषयत्वसंबंधावच्छिन्नप्रतियोगितावच्छेदकतायां अवच्छेदका
संबंधावच्छिन्नप्रतियोगिताक घटत्वनिष्ठनिरवच्छिन्नसाध्यतावच्छेदकत्वाभाववविशिष्टधर्मानवच्छिन्नत्वेन पटत्वनिष्ठनिरवच्छि
न्नावच्छेदकतानस्वाभाववद्धर्मानवच्छिन्नसंबंधेन साध्यतावच्छेदकविशिष्टान्या किन्तु पटत्वत्वावच्छिन्नावच्छेदकता यमत्वनिरूपकाव
स्थोक्तभेदीयप्रतियोगितासत्त्वात् अतः स्वसामानाधिकरण्यविशेषणोपादानमावश्यकं तथा च पटत्वनिष्ठावच्छेदकतायां घटत्वनिष्ठनिरवच्छिन्नाव | संबंध
च्छेदकतासामानाधिकरण्यविरहात् निरुक्तोभयसंबंधेनसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपकस्वोक्तभेदीयप्रतियोगिता
यामसत्त्वात् नादर्शभेदोने वलक्षणघटकइतिनाव्याप्तिः न च जातिर्घ्याविशिष्टव्यत्वादित्यादौ हेतुसमानाधिकरणजातिमदन्योन्याभावीयप्र
मा । योगितायां निरवच्छिन्नावच्छेदकतासापि उभयसंबंधेन जातित्वावच्छिन्नसाध्यतावच्छेदकविशिष्टतदन्यघटत्वादावच्छिन्ना
वच्छेदकतायाश्च निरूपिका यो उक्ताभावीयप्रतियोगितातदवच्छेदकत्वस्य जातौ सत्त्वात् अव्याप्तिरिति वाच्यम् जाति
मद्रूपे नास्तीति प्रतीतिर्हि घटो नास्तीति प्रतीतिसिद्धजातिनिष्ठनिरवच्छिन्नावच्छेदकत्वमेवावगाहते न जातौ जातित्वावच्छिन्नाव
च्छेदकत्वान्तरं अत एव प्रमेयवद्भूवान्नास्तीति प्रतीतिरपि दण्डी नास्तीति सिद्धदण्डत्वावच्छिन्नावच्छेदकत्वमेवावगाहते नेतु प्रमेयत्व

पृ २

(सिद्धान्त ... गदा. प. ...)

त्वावच्छिन्नावच्छेदकत्वमिति जगदीशसंमतं. अतएव द्वित्वीति[illegible]नापि प्रमेयधूमवान्नास्तीति वक्तुं [illegible]रपि धर्मावच्छेदकः प्रतियो
योगिता या द्रव्यत्वपेक्षया कम्बुग्रीवादिमान्नास्तीत्यादिग्रन्थेनावच्छेदकत्वनिरूक्तौ वक्ष्यते धूमो नास्तीति प्रतीतिसिद्ध धूमत्वानवच्छि
न्नावच्छेदकत्वमादायैवोपपत्तेः तथाच जातिमद्भेदे भावस्य प्रतियोगितावच्छेदकत्वाभावस्य द्रव्यत्वजातौ सत्वात्तदभावमादायैव न जाति
त्ववान् द्रव्यत्वादित्यत्राव्याप्तिः ननु महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीति सिद्धाभावप्रतियोगितायाः साध्यतावच्छेदकवह्नित्वतदि
तरैकव्यत्त्वेन च अवच्छेदकतया कथं साध्यतावच्छेदकतदितरोभयानवच्छिन्नासा प्रतियोगिता न च वह्निनिरूपितसमवायसंबंधावच्छिन्नम
हानसीयवह्निवृत्तिताविशिष्टाया जातेः तादृशाभावस्य महानसीयवह्निवृत्तित्वविशिष्टवह्नित्वतदभावस्य वा या प्रतियोगिता सा वह्नित्वेनावा(
वच्छिन्नाइति जातिमदभावमादायाव्याप्तिर्भविष्यतीति वाच्यं यथा प्रमेयदंडवान्नास्तीति प्रतीतिर्दण्डो नास्तीति प्रतीतिसिद्धशक्यत्वे दंडनिष्ठ
दंडत्वमात्रावच्छिन्नावच्छेदकत्वमेवमेवावगाहनात् ननु प्रमेयदंडत्वावच्छिन्ने अवच्छेदकत्वान्तरं तथा समवायसंबंधावच्छिन्नमहानसीयव
वह्निवृत्तित्वविशिष्टवान्नास्तीति प्रतीतिसिद्धं यत्समवायसंबंधावच्छिन्नमहानसीयवह्निवृत्तित्ववैशिष्ट्यानवच्छिन्नं वह्नित्वद्रव्यत्वादिनो
ष्ठमवच्छेदकत्वं तदेव महानसीयवह्निवृत्तित्वादिविशिष्टवह्नित्ववान्नास्तीति प्रतीत्यावगाह्यते ननु महानसीयवह्निवृत्तित्ववैशिष्ट्यवह्नि
त्वत्व एतदुभयधर्मावच्छिन्नावच्छेदकत्वं तथाच कथं साध्यतावच्छेदकतदितरोभयधर्मावच्छिन्नाइति चेत् महानसीयवह्निवृत्तित्वविशिष्टवह्नित्वत्व
वान् धूमादित्यत्रातिव्याप्तिः तादृशाभावीयप्रतियोगिताया अपि साध्यतावच्छेदकतदितरोभयधर्मावच्छिन्नत्वात् अतः स्वनिरूपकभिन्नपर्यकृतसाध्य
तावच्छेदकपर्याप्त्यवच्छेदकीभूतधर्मावच्छिन्नपर्याप्तिकावच्छेदकतानिरूपकत्व एतदुभयसंबंधेन अवच्छेदकताविशिष्टान्या या प्रतियोगिता
तदनवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणीयत्वात् तथाच वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावीयप्रतियोगितायां वह्नित्वनिष्ठावच्छेदक

श्रीगुरुभ्यो नमः

कतां निरूपकत्वमप्यास्तं एवं वह्निनिष्ठावच्छेदकताभिन्नायां महानसीयत्वनिष्ठावच्छेदकतायां तन्निरूपकत्वस्य मप्यस्ति महानसीयनिष्ठायां महानसी
यवह्न्यभावीयप्रतियोगितावच्छेदकतायां महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतात्वेनव्यासज्यवृत्तिरिति तन्निरूपिताभावच्छेदकं महानसीयत्व वह्नित्वोभ
यत्वं वह्निमात्रधूमादिस्थले च साध्यतावच्छेदकताऽव्यासज्यवृत्तितापर्याप्त्यवच्छेदकं वह्नित्वनिष्ठैकत्वं साध्यतावच्छेदकतापर्याप्त्यवच्छेदकपदेकत्वमुभि
तदवच्छिन्नापर्याप्तिकत्वमपि महानसीयत्वनिष्ठावच्छेदकतायामधिकतमहानसीयवह्नित्वत्वविशिष्टवह्नित्ववान्नास्तीत्यभावीयायाः प्रतियोगितावच्छेद
कतायां महानसीयवह्निवृत्तित्वविशिष्ट्यावच्छिन्नावह्नित्वद्वयत्वसाधारण्येकावच्छेदकतातन्निरूपकत्वमेव तादृशप्रतियोगितायां ननु अवच्छेदकताद्वयानि
रूपकत्वमिति निरुक्तोभयसंबंधेन अवच्छेदकताविशिष्टान्यत्वं अत्रोक्तमेवेति तदभावमादायाव्याप्तिवारणार्थं निरवच्छिन्नावच्छेदकत्वनिवेशनं वस्तुतः
पर्यन्तसाध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपिकासत्तियाः साध्यतावच्छेदकविशिष्टान्याऽवच्छेदकतानिरूपिताप्रतियोगितात्तदन्यत्वस्य प्रति
योगितायां निवेशे महानसीयवह्निवृत्तित्वविशिष्ट्यावच्छिन्नायावच्छेदकतातस्य स्वाभाववत्त्वमनवच्छिन्नविरहेण महानसीयवह्निवृत्तित्ववैशि
वच्छेदकता ष्ट्यावच्छिन्नांप्रतियोगितां निरुक्तोभयसंबंधेन साध्यतावच्छेदकताविशिष्टा[illegible]ऽवच्छेदकतानिवेशेनापि निरवच्छिन्नत्वनिवेशव्यावृत्तिसंभ
वति स्वमत्र विषयितासंबंधेन वह्नित्वविशिष्टस्य तादात्म्येन साध्यता च वह्नित्वविशिष्टविषयकज्ञानस्य त्वं हेतुस्तत्रापि वह्नित्वत्वं साध्यता
वच्छेदकत्वं विषयितासंबंधेन वह्नित्वे स्य स्वरूपतो भानात् तत्र हेत्वधिकरणवृत्तित्वेति ज्ञाने विषयितासंबंधेन वह्नित्वत्वावच्छिन्नवह्नित्वविशिष्ट
स्यभेदावर्त्तते विषयिसंबंधेन वह्नित्वत्वावच्छिन्नत्वनास्य वह्नित्ववानिति ज्ञाने स्वं सत्वादिति साध्यतावच्छेदकतादौ[illegible]संबंधावच्छिन्नप्रतियोगि
ताकोऽयमत्ताद्दशोभेदः तत्प्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्वात् अव्याप्तिरतो निरवच्छिन्नत्वस्यावच्छेदकतायां निवेशः ननु अवच्छेदकता
तायां निरवच्छिन्नत्वस्य निवेशेपि महानसीयवह्निवृत्तित्वविशिष्टजातित्ववान् धूमादित्यादावतिव्याप्तिः तत्र व्यभिचारिमात्रस्यैव सर्वलक्षणे
लक्ष्यतया तादृशव्यभिचारिव्याप्तिसद्भसाध्यतावच्छेदकस्य चेत् लक्षणालक्ष्यत्वात् तत्र साध्याभावीयप्रतियोगितावच्छेदकतापा

लक्षणाघटकेति ८

सिद्धान्त० लक्ष० ८

निरवच्छिन्नत्वविरहेण लक्षणाघटकतया लक्षणघटकीभूतघटाभावीयप्रतियोगितानवच्छेदकच्छेदकत्वसाध्यतावच्छे-
दकेसत्वात् यघनिष्ठसावच्छिन्नावच्छेदकतासामान्यं साध्यतावच्छेदकताभिन्नं तत्तन्निष्ठसावच्छिन्नावच्छेदकतानि-
रूपकत्वस्य प्रतियोगितायां विवक्षितत्वात् तथाच वह्निमान् धूमादित्यादौ महानसीयवह्निव्यक्तित्वविशिष्टजातिमदभा-
वीयप्रतियोगितावच्छेदकता तस्या लक्षणाघटकत्व वह्नित्वनिष्ठसावच्छिन्नावच्छेदकतासामान्यं साध्यतावच्छेदक-
ताभिन्नं तन्निष्ठसावच्छिन्नावच्छेदकत्वनिरूपकत्वस्य तदभावीयप्रतियोगितायामसत्वात् तादृशव्यभिचारस्थिता
दृशसाध्याभावलक्षणघटकस्य तत्र वह्नित्वनिष्ठसावच्छिन्नावच्छेदकतायां साध्यतावच्छेदकताभिन्नत्वस्य विर-
हेण यत्पदेन वह्नित्वस्य धर्तुमशक्यतया यत्पदघटितघटत्वादिनिष्ठायावच्छेदकत्वस्य तदनिरूपकत्वस्य साध्या-
भावीयप्रतियोगितायां सत्वात् यद्धर्मेति वीप्साकरणात् घटत्वनिष्ठावच्छेदकत्वानिरूपकत्वस्य महानसीयवह्निव्यक्तित्ववि-
शिष्टजातिमदभावीयप्रतियोगितायां सत्वेपि नाव्याप्तिः वह्नित्वनिष्ठसावच्छिन्नप्रतियोगितावच्छेदकतायां वह्नित्वत्वानित्यवृत्ति-
तिविधेयता विधेयताभिन्नत्वसत्वात् (वच्छेदक) तन्निष्ठसावच्छिन्नावच्छेदकत्वनिरूपकत्वस्य वह्नित्ववदभावीयप्रतियोगितायामसत्वात् महानसीयवह्निव्य-
क्तित्वविशिष्टवह्नित्ववत्त्वाद्धूमादित्यादौ अतिव्याप्तिरतः सामान्यपदोपादानं तथाच वह्नित्वनिष्ठसावच्छिन्नावच्छेदकतासामान्यान्तर्ग-
तसाध्यतावच्छेदकतायां साध्यतावच्छेदकताभिन्नत्वविरहेण यत्पदेन वह्नित्वं धर्तुं न शक्यते किन्तु घटत्वादिकमेव तन्निष्ठसावच्छिन्नावच्छेदक-
त्वानिरूपकत्वस्य वह्नित्ववदभावीयप्रतियोगितायां सत्वान्नातिव्याप्तिः वह्निमान् धूमादित्यत्र वह्नित्वनिष्ठावच्छेदकतासामान्ये साध्यतावच्छेद-
कताभिन्नत्वविरहात् यत्पदेन धर्तुमशक्यतया महानसीयवह्निव्यक्तित्वविशिष्टवह्नित्वमदभावमादायाव्याप्तिस्तादवस्थ्यम्
अतो यन्निष्ठावच्छेदकतत्तत्सावच्छिन्नत्वस्य प्रवेशः
ध

मी ६

धत्त्वनिष्ठसावच्छिन्नाभाववत्त्वेऽल्पायां साध्यतावच्छेदकताभिन्नत्वसत्त्वात् तन्निष्ठावच्छेदकत्वानिरूपकत्वस्य घटाभावीयप्रतियोगि
तायां सत्त्वात् घटाभावस्य लक्षणे घटकत्वानुपपत्तेः. अत तन्निष्ठावच्छेदकत्वानिरूपकत्वमपहाय तन्निष्ठसावच्छिन्नावच्छे
दकत्वस्य प्रवेशः तच्च यद्यप्येवं वेशेन च महागौरवमिति वाच्यं साध्यतावच्छेदकत्वावृत्तिधर्मनिष्ठसावच्छिन्नावच्छेदका
त्वानिरूपकत्वेन तत्पर्यवसितसाध्यतावच्छेदकत्वावच्छिन्नत्वस्य तन्निष्ठसावच्छिन्नावच्छेदकतात्वसंबंधावच्छिन्नवृत्तित्वीय
स्यैकस्य संबंधावच्छिन्नप्रतियोगिताकः तथा च वह्निमान् धूमादित्यत्र तादृशसंबंधावच्छिन्नवृत्तित्वीयस्य च स्वरूपसं
बंधेन साध्यतावच्छेदकवृत्तितायां अर्थमा केवलान्वयीति वह्नित्वे मपि तादृशाभाववन्निष्ठसावच्छिन्नावच्छेदकत्वानिरूपकस्य म
हानसीयवह्निवृत्तित्वविशिष्टवह्नित्वबदभावीयप्रतियोगितायां सत्त्वान्नाव्याप्तिः नचैवमपि वह्नित्वबद्वह्निमान् धूमादित्यत्र मह
नसीयवह्निवृत्तित्वविशिष्टवह्नित्वबदभावमादायाव्याप्तिवारणमसंभव एव तत्र स्वनिष्ठअवच्छेदकतात्वसंबंधेन वह्नित्वस्य साध्य
तावच्छेदकतावृत्तित्वेन निरुक्तसाध्यतावच्छेदकत्वावृत्तिघटत्वादिनिष्ठसावच्छिन्नावच्छेदकत्वानिरूपकत्वस्य तदभावस्य प्रतियो
गितायां सत्त्वादिति वाच्यं शुद्धसाध्यतावच्छेदकपदेन विशिष्टसाध्यतावच्छेदकभिन्नत्वस्य विवक्षणीयतया तादृशस्य लक्षणस्य विशिष्ट
साध्यतावच्छेदकस्य लक्षभिन्नत्वविरहात् अतो यद्रूपेण साध्यतावच्छेदकता तत्तद्धर्मभिन्नयधर्मानवच्छिन्नत्वस्यावच्छेदकतायां विवक्षणी॥
यत्वात् ननु विशिष्टसाध्यतावच्छेदकस्थले तादृशोभयानवच्छिन्नत्वस्य विवक्षणीयत्वेऽपि वह्नित्ववान् धूमादित्यत्र महानसीय
वह्निवृत्तित्वविशिष्टजातिमदभावमादायाव्याप्तिवारणं तु शक्यमेव तादृशाभावीयप्रतियोगितावच्छेदकतायां वह्नित्वत्वान
वच्छिन्नतया साध्यतावच्छेदकतावच्छेदकतदितरोभयधर्मानवच्छिन्नत्वस्य तत्र सत्त्वादिति वाच्यं तादृशोभयानवच्छि

(विशि० सा० जं० जगदीश्यां)

न्नावच्छेदकतोऽन्यस्य साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नावच्छेदकतायां तात्पर्यात् तथा चोक्तस्थले महानसीयवह्नित्वन्तच्च विशिष्टजातित्वा
वच्छिन्नावच्छेदकतायां वह्नित्वत्वातिरिक्तेन महानसीयवह्नित्ववैशिष्ट्यानवच्छिन्नतया तादृशाभावस्य लक्षणघटकत्वात् नचैवं तत्तद्रूपिमान् हृदिसं
गादित्यत्र घटपदभावस्य लक्षणघटकत्वोपपत्तेः जातीतरस्य स्वरूपतोभानोपगमेन घटनिष्ठप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकता
वच्छेदकेतरानवच्छिन्नत्वात् घटाभावीय घटत्वनिष्ठनिरवच्छिन्नप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वेऽपि
साध्यतावच्छेदकताघटकसंयोगसंबंधावच्छिन्नत्वविरहेण लक्षणघटकत्वासंभवादिति वाच्यं साध्यतावच्छेदकतावच्छेदकभिन्नो यः साध्यताव
च्छेदकनिष्ठो धर्मः तदनवच्छिन्नाया अवच्छेदकतायास्तस्य विवक्षितत्वात् तथा च घटत्वस्य साध्यतावच्छेदकतावच्छेदकत्वत्वादौ इत्यभिन्नत्वेऽपि तद्
ण्डवृत्तित्वात् घटवदभावीयप्रतियोगितावच्छेदकताया अपि लक्षणघटकत्वोपपत्तेः नचैवं प्रमेयवह्नान् घटत्वादित्यादौ घटवदभावीयप्रतियोगिता
साध्यतावच्छेदकतावच्छेदकं यत् प्रमेयत्वं तदतिरिक्तप्रमेयवृत्ति घटत्वावच्छिन्नाया घटवदभावीयप्रतियोगितावच्छेदकताया अपि तत्र ल
क्षणघटकत्वानुपपत्तेरिति वाच्यं यत्र वह्नित्वप्रतियोगिकसमवायसंबंधेन वह्नित्वविशिष्टस्य साध्यता धूमो हेतुस्तत्राव्याप्तिवारणाय साध्यताघ
टकसंबंधावच्छिन्नावच्छेदकताप्रतियोगिकस्वरूपसंबंधेन हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकताभावस्य विवक्षणीयतया संयोगादि
संबंधेन प्रमेयसाध्यतावच्छेदकस्थले घटाभावीयाया निरवच्छिन्नप्रतियोगितावच्छेदकतायास्तस्याः साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नतया लक्ष
णघटकतया साध्यतावच्छेदकतावच्छेदकसंबंधावच्छिन्नावच्छेदकताप्रतियोगिकस्वरूपसंबंधेन तदवच्छेदकत्वाभावस्य साध्यतावच्छेदके सत्त्वान्ना
व्याप्तिः एवञ्च धर्मे साध्यतावच्छेदकनिष्ठत्वमपि नोपादेयं केचित्तु स्वं साध्यतावच्छेदकतास्वावच्छेदकानवच्छिन्नत्व स्वसामानाधिकरण्य एतदुभयसं
बंधेन साध्यतावच्छेदकविशिष्टाया अवच्छेदकतायास्तदनिरूपकत्वं प्रतियोगितायां विवक्षणीयं तथा च वह्नित्वत्ववान् धूमादित्यत्र महानसीयवह्नित्वविशिष्ट

जातिमदभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकीभूतवह्नित्वत्वानवच्छिन्नत्वस्य तादृशसाध्यतावच्छेदक
तासामानाधिकरण्यस्य च सत्वेन साध्यतावच्छेदकताविशिष्टजातित्वावच्छिन्नावच्छेदकताभवतितदनिरूपकत्वस्य महानसीयवह्निव्यक्तित्व
विशिष्टजातिमदभावीयप्रतियोगितासत्वात् तादृशाभावो वह्नित्ववत्वाद् धूमादित्यत्र लक्षणघटको भवितुमर्हति एवञ्च जातिमद्वान्य
त्वादित्यादौ घटसमवेतविशिष्टजातिमदभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकानवच्छिन्नत्वविरहेण तादृशतदभाव
संबंधेन साध्यतावच्छेदकताविशिष्टान्तादृशाभावीयप्रतियोगितावच्छेदकताकिञ्च घटाभावीयप्रतियोगितावच्छेदकतातदनिरूपकत्वस्य
घटसमवेतत्वविशिष्टजातिमदभावीयप्रतियोगितायां सत्वेन तादृशाभावमादाय व्याप्तिवारणाय पदरूपेण साध्यतावच्छेदकतातत्तदितर
निवेशेनापि साधु संगच्छते इत्याहुः स्वमते तु सत्वन्यूनवृत्तिजातिमद्वान् रूपादित्यादौ नीलाभाववपीताभावप्रतियोगितावच्छेदकतायां साध्यताव
वच्छेदकतावच्छेदकानवच्छिन्नत्वस्य साध्यतावच्छेदकतासामानाधिकरण्यस्य एतदुभयसंबंधेन साध्यतावच्छेदकताविशिष्टायास्तादृशाभावीयनीलत्वनिष्ठाव
च्छेदकतातन्निरूपकत्वस्य नीलाभावीयप्रतियोगितायां सत्वेन लक्षणाघटकत्वात् यात्तादृशाभावमादाय तत्र व्याप्तिदानं जगदीशसंमतं संगच्छते तस्य सा
धनेव यत् इष्यामहे परं तु वच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकत्वाभावविशिष्टो यो धर्मस्तद्धर्मावच्छेदकत्वानिरूपिका या प्रतियोगि
तातद्देव शुद्धसाध्यतावच्छेदकस्थले विशिष्टसाध्यतावच्छेदकस्थले च लक्षणघटिकातथा च वह्निमान् धूमादित्यत्र साध्यतावच्छेदकतानिरवच्छिन्नावच्छेदकता
संबंधेन तत्रापि नवर्त्तते इति अवच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकत्वाभावे संयोगसंबंधावच्छिन्नप्रतियोगिताकरूपाभाववत्केवला
न्वयित्वादिति तदभावाश्रयमहानसीयवह्निव्यक्तित्वविशिष्टमपि भवति एवं जातित्वमपि भवति तदवच्छिन्नावच्छेदकत्वानिरूपकत्वं महानसीयवह्निव्यक्ति
त्वविशिष्टजातिमदभावीयप्रतियोगितायामिति तदभावमादाय शुद्धसाध्यतावच्छेदकस्थलेनाव्याप्तिः एवं जातिमद्वान् घटत्वादित्यत्र साध्यतावच्छेदकता

(सिद्धान्त॰ लो॰ प॰ चतुर्दशलक्षणी) ६

त्वणाद्यधिकरणतायास्तत्र सत्वादिति चेन्न इदानीमधिकरणभेदेनाधिकरणताभिन्ना नैकधर्मावच्छिन्नाधिकरणता एकात्तत्रासांति धूमवा
निति प्रतीतेः धूमत्वाश्रयनिरूपिताधिकरणत्वावगाहित्वे पर्वतत्ववैशिष्ट्यावच्छिन्नाया धूमत्वनतादिसाधारणनिरूपिता एकाधिकरणतास्य
धूमशून्ये पर्वते सत्वात् तत्रापि धूमवानिति प्रमात्वोपत्तेः तथा च पर्वतत्वविशिष्टधूमवदिति प्रतीतौ पर्वतत्ववैशिष्ट्यावच्छिन्नत्वमे
वाधिकरणतायां भासते न तु धूमत्वावच्छिन्नत्वमपि एवञ्च पर्वतत्ववैशिष्ट्यावच्छिन्नधूमाश्रयनिरूपिताधिकरणतात्वेनैव पर्वत
वैशिष्ट्य धूमत्वाश्रयाधिकरणत्वं पर्वतत्वविशिष्टधूमवानिति प्रतीतौ अस्तीति हेतुतावच्छेदकेतरानवच्छिन्नत्वस्य आधिकरणता
यामप्रवेशे च वह्निमान् धूमादित्यत्र हेतुतावच्छेदकावच्छिन्नाधिकरणत्वाप्रसिद्ध्या अव्याप्तिः [illegible] अतएव [illegible]
शिकायामपि रूपत्वावच्छिन्नाधिकरणताया अतिरिक्तत्वमते साधयधिकरणभेदेऽप्येकात्तदा रूपत्वेन घटीयरूपस्याधिकरणं घटः इत्यविभूती
त्यापत्तिः रूपत्वावच्छिन्न घटीयरूपानिरूपिताधिकरणताया एव घटीयरूपनिरूपितत्वात् तत्स्वधिकरणभेदेन रूपत्वावच्छिन्नाधिकरणतायामानारूपि
हन्त अतएव हेत्वाधिकरणे वृत्तियोग्यत्वं धिकरणत्वनिवेशे गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेः [illegible] अन्यथा
घटाभावीयप्रतियोगितानिरूपिताया समवायसंबंधावच्छिन्नप्रमेयत्वावच्छिन्नाधिकरणता तस्या एव गुणादौ सत्वात् अप्रसिद्धेनैव घटेनादेवा
तिव्याप्तिर्नास्ति किन्तु वह्निमान् धूमादित्यत्र उक्तक्रमेण व्याप्तिरेवास्यात् न च द्रव्यं गुणकर्मान्यत्वविशिष्टसत्तावदिति प्रतीतौ घटवृत्ति
त्वविशिष्टसत्ताया [illegible] च्छिन्नाधिकरणतायास्मिन् विशिष्टसत्तात्वावच्छिन्नाधिकरणतादिविषयकत्वमेवास्त्विति गुणकर्मान्य

श्रीदुर्गायैनमः

त्वविशिष्टसत्त्वात्वावच्छिन्नाधिकरणतास्वीकारे तु विपर्ययम् तादृशप्रतीतिर्न घटवत्तित्वविशिष्टसत्त्वात्वावच्छिन्नाधिकरणतात्वेन तादृशाधि
करणताव्यगाहित्वं घटवृत्तित्वविशिष्टसत्त्वात्वावच्छिन्नाधिकरणतात्वादीनामननुगमात् तादृशप्रतीते रनुगताकारत्वस्य संभवति विषया
नुगमं विना अनुगताकारप्रत्ययायोगात् इति दीधितिकारग्रन्थात् विशिष्टसत्तानिरूपिताधिकरणतात्वेन तादृशाधिकरणताव्यगाहित्वे
गुणान्यत्वविशिष्टसत्त्वात्वावच्छिन्नाधिकरणताया अपि विशिष्टसत्तानिरूपिताधिकरणतात्वेन गुणे गुणकर्मान्यत्वविशिष्टसत्तावा
नित्यादेरपि प्रमात्वापत्तेः गुणे गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीतेः प्रमात्वाभावप्रसङ्गश्च । अनुयोगितावच्छेदकविशिष्ट
सत्त्वनिरूपिताधिकरणतायां गुणेऽपि सत्त्वात् न एवं च अनुयोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्यैव [illegible] सिद्धत्वात् ननु
गुणकर्मान्यत्वविशिष्टसत्तावान् गुण इति शाब्दप्रतीतेः गुणकर्मान्यत्ववैशिष्ट्यावच्छिन्नाधिकरणताव्यगाहित्वे ननु अधिकरणतायां
सत्त्वात्वावच्छिन्नत्वमपि इति न गुणकर्मान्यत्वविशिष्टसत्तात्वमधिकरणकरणतावच्छेदकं एवं च गुणकर्मान्यत्वविशिष्टसत्तात्वे ॥
त्वांशे यीभूत गुणनिष्ठाऽधिकरणतानवच्छेदकत्वेऽपि अधिकरणताऽवच्छेदकत्वाभावादेव उभयाभावसत्त्वेन पत्यदेन गुणोऽपि
धर्तुं शक्यते इति तन्निष्ठाऽभावप्रतियोगितानवच्छेदकत्वस्य द्रव्यत्वे सत्त्वात् द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादिव्या
प्तिग्रहस्यैवेति चेन्न हेतुतावच्छेदकसामानाधिकरण्ये निरुक्ताभाववत्त्वस्य विवक्षितत्वात् हेतुतावच्छेदकतायाश्च पर्याप्तिर्न
निवेशनीया एवं च हेतुतावच्छेदकतानतीत गुणान्यत्ववैशिष्ट्ये गुणनिष्ठाधिकरणतानवच्छेदकत्वादधिकरणता वच्छेदकत्वोभयसंबंधेन

(अ. सिद्धान्त. प. सत्ताखण्ड) २८

वच्छिन्नस्य तादात्म्यसंबंधेनाभाववमादाय तत्राव्याप्तेर्दुर्वारत्वात् एवं दण्डिमान् दण्डसंयोगादित्यत्र हेतुसमानाधिकरणतत्तद्दण्डविशिष्टाभावीयप्रतियोगितावच्छेदक
कतायाः तत्तद्दण्डत्वेन दुर्ग्रहत्वात् धर्मविच्छिन्नत्वेऽपि साध्यतावच्छेदकतावच्छेदकातिरिक्तधर्मवैशिष्ट्यं तदनवच्छिन्नत्वं यानदभाववमादाय तादृशस्थलेऽव्याप्ति
संभवे यदिच स्वरूपदण्डस्यावच्छेदकत्वावगाहि ज्ञत्यान्तरस्यासत्वात् इति ग्रन्थस्य असङ्गतापत्तिरिति ग्रन्थस्य असङ्गतापत्तिरिति चिन्तनीयम् अतु मन्त्रं
दविशिष्टयद्दण्डत्वं तद्विशिष्टावच्छिन्नाभावमादाय दण्डिमान् दण्डसंयोगादित्यत्राव्याप्तिः साध्यतावच्छेदकतावच्छेदकतादिनरोऽभिप्रायात्तानव
च्छिन्नत्वस्यावच्छेदकतायां निवेशेऽपि संभवति तादृशाभावीयप्रतियोगितावच्छेदकतायाः तद्दण्डत्वमात्रेणैवावच्छिन्नत्वात् इति चेत् यथाश्रु
तु साध्यतावच्छेदकस्थले निरवच्छिन्नमेवावच्छेदकता निविष्टं तथास्तु साध्याभावच्छेदकस्थले सावच्छिन्नत्वावच्छेदकत्वानिरूपक
त्व [illegible] भावच्छेदकतायां यदि निवेश्यते तदाऽभयाभावभावमादाय दण्डिमान् दण्डसंयोगादित्यत्राव्याप्तिर्न संभवति तादृशाभावीयप्रति
नियतप्रतियोगितावच्छेदकतायां तद्दण्डत्वत्ववैशिष्ट्यावच्छिन्नतायां दण्डत्वनिष्ठावच्छेदकतानिरूपितत्वात् अत एव वादिपदग्रा
रूपत्वं न [illegible] जातिमत्वान्रूपादित्यादावव्याप्तिर्दत्ता जगदीशेन यद्यप्येवं धूमाभिः पर्वतत्वादितत्तद्धर्मविशिष्टधूमत्वाव
च्छिन्नाधिकरणतावृत्तिवेव धूमवानिति प्रतीत्युपपत्तौ धूमत्वावच्छिन्नाधिकरणतायां मानाभावादिति जगदीशः ग्रन्थः
यथात्र पर्वतत्वविशिष्टधूमवानिति प्रतीतौ पर्वतत्ववैशिष्ट्यधूमनिरूपिताधिकरणत्वावगाहित्वमस्तु अन्यथैव

श्रीदुर्गायै नमः

(निरूपितत्वसंबंधेन)

अधिकरणतायां पर्वतत्ववैशिष्ट्यधूमत्वैतदुभयावच्छिन्नत्वे मानाभावात् तथाच कथमवच्छेदकत्वाभिधिरिति ग्रन्थसंगतिरिति चेन्न यत्र पर्वते चत्वरे च एकोऽ
हि धूमस्तत्राऽव्यापि पर्वतत्वविशिष्टधूमवच्चत्वरमिति प्रतीत्यापत्तेः वस्तुगत्या पर्वतत्वविशिष्टो यो धूमस्तस्य चत्वरेऽपि सत्वात् अतः पर्वतत्ववि
शिष्टधूमवच्चत्वरमिति शब्दप्रतीतौ मतुबर्थसंबन्धोत्यावच्छिन्नैकदेशे सम्बन्धित्वे पर्वतत्वविशिष्टधूमत्वावच्छिन्नत्वमेव भासते एवञ्च धूमवानि
ति साध्यप्रतीतौ धूमनिरूपिताधिकरणतात्वेनैव धूमनिरूपिताधिकरणत्वावगाहित्वं धूमनिरूपिताधिकरणतायाः कस्यापि धूमावच्छिन्ने
(वच्छिन्नाया गुणकर्मान्यत्वविशिष्टसत्व)
सत्वादिति प्रसिद्ध्यभावात् गुणकर्मान्यत्वविशिष्टसत्वनिरूपितायाः गुणकर्मान्यत्वविशिष्टसत्वनिरूपिताधिकरणतात्वेनेति भावः यथा
अधिकरणतायां गुणेऽपि सत्वात् गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति शाब्दप्रतीतेः प्रमात्वापत्तिरतो गुणकर्मान्यत्वविशिष्टस
त्तात्वावच्छिन्नाधिकरणत्वावगाहित्वं तादृशशाब्दप्रतीतेर्वक्तव्यमन्यथा मिति द्रव्यं विशिष्टसत्वादित्यत्र हेतुतावच्छेदकावच्छेदकावच्छिन्नाधिकरणा
ताप्रसिद्धिरतो विशिष्टहेतुकस्थलेऽव्याप्त्यभावादसंभवोऽन्योन्याभावो नतु पर्वतत्ववैशिष्ट्यधूमत्वैतदुभयधर्मावच्छिन्नाधिकरणतायां अपि धूमत्वावच्छि
न्नैव हेतुतावच्छेदकेन तावन्मात्रावच्छिन्नत्वस्याधिकरणतायां प्रवेशे बीजाभावात् हेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्य हेतुतावच्छेद
कताव्यापकावच्छेदकताकत्वस्य वा अधिकरणतायां प्रवेशेनैव द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यत्र केवलसत्वावच्छिन्नाधिकरणतामादायाव्या
प्तिविरहात् तथाच कथं वह्निमान् धूमादित्यत्र धूमत्वावच्छिन्नाधिकरणत्वाप्रसिद्ध्या अव्याप्तिरिति नच पर्वतत्वविशिष्टधूमवदिति प्रतीतेः पर्वत
त्ववैशिष्ट्यावच्छिन्नत्वेनाधिकरणतामवगाहते इति वाच्यम् तथाच धूमशून्ये पर्वतेऽपि पर्वतत्वविशिष्टधूमवदिति प्रतीत्यापत्तेः पर्वतत्ववैशिष्ट्यावच्छिन्न
करण?

८

हेतुतावच्छेदक सामानाधिकरण्येन तादृशोभयाभावः इति पत्पदेन गुण धर्तुं न शक्यते किन्तु द्रव्यमेवेति नातिव्याप्तिः ॥
अत्रेदमवधेयम् स्वाश्रयाधिकरणीभूत यन्निष्ठा धिकरणता न वच्छेदकत्व मित्यत्रा धिकरणत्वं हेतुतावच्छेदक संबंधावच्छि
न्नं वक्तव्यम् अन्यथा द्रव्यं गुण कर्मान्यत्वविशिष्ट सत्तावान् जातेरित्यत्र विशिष्ट सत्ताश्रयीभूतं यद्विशिष्ट सत्तावानि
ति ज्ञानं तन्निष्ठाया विषयता संबंधावच्छिन्न स्वसंबंधितावच्छेदकत्वं विशिष्ट सत्तात्वेऽस्ति विषयता संबंधावच्छिन्न स्वसं
बंधितायाः सत्तावानिति ज्ञाने विरहात् विषयाता विशिष्ट सत्तावानिति प्रतीतेः विशिष्टसत्तात्वावच्छिन्न तादृश संबं
धावच्छिन्न स्वसंबंधित्वावगाहित्वस्यावश्यकत्वात् एवञ्च गुण कर्मान्यत्व विशिष्ट सत्तात्वे ऽधिकरणतावच्छेदकसत्वेपि
विशिष्ट सत्तावानित्याकारक ज्ञाननिष्ठाऽधिकरणता वच्छेदकत्व सामान्याभाव विरहात् स्वाश्रयाधिकरणीभूतय
त्पदेन तादृश ज्ञानमपि धर्तुं शक्यतया तज्ज्ञाननिष्ठाऽभाव प्रतियोगिता नवच्छेदकत्वस्य द्रव्यत्वत्वे विरहात् अव्याप्त्या
पत्तेः यत्र पूर्वक्षण निरूपित कालिक संबंधावच्छिन्न वृत्तिता विशिष्ट तद्घटस्य कालिकेन हेतुता पूर्वक्षणत्वस्य स्वरू
पेण साध्यता तत्राव्याप्तिः तथाहि पूर्वक्षण निरूपित कालिक संबंधावच्छेदेन वृत्तित्व विशिष्ट तद्घटत्वावच्छिन्न
संयोग संबंधावच्छिन्ना धिकरणतायाः पूर्वक्षणातिरिक्त क्षणावच्छेदेन तद्घटवति देशे विरहात् =

पूर्वक्षण निरूपित कालिक संयोग संबंधावच्छिन्न वृत्तित्व विशिष्ट संयोग संबंधावच्छिन्नाधिकरणताया अव्यतिरिक्तत्वा-
स्वीकारात् स्वरूप हेतुतावच्छेदकीभूत कालिक संबंधेन तद्घटस्याधिकरणं यथा पूर्वक्षणे भवति तथा पूर्वक्षणावच्छेदेन
संयोगेन तद्घटवान् प्रदेशः सोपि भवति तन्निष्ठ संबंधावच्छिन्नाधिकरणतावच्छेदकत्व कालिक संबंधावच्छिन्न पूर्व
क्षण वृत्तित्व विशिष्ट तद्घटत्वेपि सत्वात् तन्निष्ठाधिकरणतावच्छेदकता सामान्याभाव घटित उभयाभावस्य तत्र सत्वात्
स्वाश्रयाधिकरणीभूत यत्पदेन कालिक संबंधेन तद्घटाधिकरणीभूतं यद्भूतलं तस्यापि धर्तुं शक्यतया तन्निष्ठाभाव
प्रतियोगि

(ज्ञा. सिद्धा. प. वर्तमानवर्णं) ८८